NCERT
National Council Of Educational Research And Training

**NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 8-विचित्रः साक्षी**

IndCareer Schools

indCareer indCareer indCareer

# NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 8-विचित्रः साक्षी

Class 10: Sanskrit (Shemushi) Chapter 8 solutions. Complete Class 10 Sanskrit (Shemushi) Chapter 8 Notes.

## NCERT Solutions for Class 10 Sanskrit (Shemushi): Chapter 8-विचित्रः साक्षी

NCERT 10th Sanskrit (Shemushi) Chapter 8, class 10 Sanskrit (Shemushi) Chapter 8 solutions

**प्रश्न 1.**

एकपदेन उत्तरं लिखत

(क) कीदृशे प्रदेशे पदयात्रा न सुखावहा?

(ख) अतिथिः केन प्रबुद्धः?

(ग) कृशकायः कः आसीत्?

(घ) न्यायाधीशः कस्मै कारागारदण्डम् आदिष्टवान्?

(ङ) कं निकषा मृतशरीरम् आसीत्?

उत्तर:

(क) विजने प्रदेशे

(ख) चौरस्य पादध्वनिना

(ग) अभियुक्तः

(घ) आरक्षिणे

(ङ) राजमार्गम्

**प्रश्न 2.**

अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत

(क) निर्धनः जनः कथं वित्तम् उपार्जितवान्?

(ख) जनः किमर्थं पदातिः गच्छति?

(ग) प्रसृते निशान्धकारे स: किम् अचिन्तयत्?

(घ) वस्तुतः चौरः कः आसीत्?

(ङ) जनस्य क्रन्दनं निशम्य आरक्षी किमुक्तवान्?

(च) मतिवैभवशालिनः दुष्कराणि कार्याणि कथं साधयन्ति?

उत्तर:

(क) निर्धनः जनः भूरि परिश्रम्य किञ्चिद् वित्तम् उपार्जितवान्।

(ख) जनः अर्थकार्येन पीडितः बसयानं विहाय पदातिः गच्छति।

(ग) 'प्रसृते निशान्धकारे विजने प्रदेशे पदयात्रा न शुभावहा' इति सः अचिन्तयत्।

(घ) वस्तुतः चौरः आरक्षी एव आसीत्।

(ङ) जनस्य क्रन्दनं निशम्य आरक्षी उक्तवान् "रे दुष्ट! त्वया अहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुस्व। त्वं वर्षत्रयस्य कारादण्ड लप्स्यसे।" इति।

(च) मतिवैभवशालिनः दुष्टकराणि कार्याणि नीति युक्तिं च समालम्ब्य लीलया एव साधयन्ति।

**प्रश्न 3.**

रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत

(क) पुत्रं द्रष्टुं सः प्रस्थितः।

(ख) करुणापरो गृही तस्मै आश्रयं प्रायच्छत् ।

(ग) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

(घ) न्यायाधीशः बंकिमचन्द्रः आसीत्।

(ङ) स भारवेदनया क्रन्दति स्म।

(च) उभौ शवं चत्वरे स्थापितवन्तौ।

प्रश्नाः-

(क) कम् द्रष्टुं सः प्रस्थितः?

(ख) करुणापरो गृही कस्मै आश्रयं प्रायच्छत्?

(ग) कस्य पादध्वनिना अतिथिः प्रबुद्धः?

(घ) न्यायाधीशः कः आसीत्?

(ङ) सः कया क्रन्दति स्म?

(च) उभौ शवं कुत्र स्थापितवन्तौ?

प्रश्न **4.**

यथानिर्देशमुत्तरत

(क) ‘आदेशं प्राप्य उभौ अचलताम्’ अत्र किं कर्तृपदम्?

(ख) ‘एतेन आरक्षिणा अध्वनि यदुक्तं तत् वर्णयामि’-अत्र ‘मार्गे’ इत्यर्थे किं पदं प्रयुक्तम्?

(ग) ‘करुणापरो गृही तस्मै आश्रयं प्रायच्छत्’-अत्र ‘तस्मै’ इति सर्वनामपदं कस्मै प्रयुक्तम्?

(घ) ‘ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्’ अस्मिन् वाक्ये किं क्रियापदम्?

(ङ) ‘दुष्कराण्यपि कर्माणि मतिवैभवशालिनः’-अत्र विशेष्यपदं किम्?

प्रश्नाः –

(क) उभौ

(ख) अध्वनि

(ग) निर्धनजनाय

(घ) आदिष्टवान्

(ङ) कर्माणि

प्रश्न **5.**

सन्धिं/सन्धिविच्छेदं च कुरुत

(क) पदातिरेव — ………. + ………….

(ख) निशान्धकारे — ………. + ………….

(ग) अभि + आगतम् — ………. + ………….

(घ) भोजन + अन्ते — ………. + ………….

(ङ) चौरोऽयम् — ………. + ………….

(च) गृह + अभ्यन्तरे — ………. + ………….

(छ) लीलयैव — ………. + ………….

(ज) यदुक्तम् — ………. + ………….

(झ) प्रबुद्धः + अतिथि: — ………. + ………….

**उत्तर:**

(क) पदातिः + एव

(ख) निशा + अन्धकारे

(ग) अभ्यागतम्

(घ) भोजनान्ते

(ङ) चौर: + अयम्

(छ) लीलया + एव

(ज) यत् + उक्तम्

(झ) प्रबुद्धोऽतिथि:

**प्रश्न 6.**

अधोलिखितानि पदानि भिन्न-भिन्नप्रत्ययान्तानि सन्ति। तानि पृथक् कृत्वा निर्दिष्टानां प्रत्ययानामधः लिखत

परिश्रम्य, उपार्जितवान्, दापयितुम्, प्रस्थितः, द्रष्टुम्, विहाय, पृष्टवान्, प्रविष्टः, आदाय, क्रोशितुम्,

नियुक्तः, नीतवान्, निर्णेतुम्, आदिष्टवान्, समागत्य, मुदितः।

| ल्यप् | क्त | क्तवतु | तुमुन् |
|---|---|---|---|
| ................ | ................ | ................ | ................ |
| ................ | ................ | ................ | ................ |
| ................ | ................ | ................ | ................ |

उत्तर:

| ल्यप् | क्त | क्तवतु | तुमुन् |
|---|---|---|---|
| परिश्रम्य | प्रस्थितः | उपार्जितवान् | दापयितुम् |
| विहाय | प्रविष्टः | पृष्टवान् | द्रष्टुम् |
| आदाय | नियुक्तः | नीतवान् | क्रोशितुम् |
| समागत्य | मुदितः | आदिष्टवान् | निर्णेतुम् |

**प्रश्न 7.**

(अ) अधोलिखितानि वाक्यानि बहुवचने परिवर्तयत

(क) स बसयानं विहाय पदातिरेव गन्तुं निश्चयं कृतवान् ।

(ख) चौरः ग्रामे नियुक्तः राजपुरुषः आसीत् ।

(ग) कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।

(घ) अन्येषुः तौ न्यायालये स्व-स्व-पक्षं स्थापितवन्तौ।

उत्तर:

(क) ते बसयानं विहाय पदातिरेव गन्तुं निश्चयं कृतवन्तः।

(ख) चौरा: ग्रामे नियुक्ताः राजपुरुषाः आसन्।

(ग) केचन चौराः गृहाभ्यन्तरं प्रविष्टाः।

(घ) अन्येधुः ते न्यायालये स्व-स्व-पक्षं स्थापितवन्तः।

(आ) कोष्ठकेषु दत्तेषु पदेषु यथानिर्दिष्टां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत

(क) सः ….. निष्क्रम्य बहिरगच्छत्। (गृहशब्दे पंचमी) (ख) गृहस्थः ……………. आश्रयं प्रायच्छत्। (अतिथिशब्दे चतुर्थी) (ग) तौ …… प्रति प्रस्थितौ। (न्यायाधिकारिन् शब्दे द्वितीया) (घ) ……….. चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे। (इदम् शब्दे सप्तमी) (ङ) चौरस्य ……….. प्रबुद्धः अतिथिः। (पादध्वनिशब्दे तृतीया)

उत्तर:

(क) सः गृहात् निष्क्रम्य बहिरगच्छत् ।

(ख) गृहस्थः अतिथये आश्रयं प्रायच्छत् ।

(ग) तौ न्यायाधीशं प्रति प्रस्थितौ।

(घ) अस्मिन् चौर्याभियोगे त्वं वर्षत्रयसय कारादण्डं लप्स्यसे।

(ङ) चौरस्य पादध्वनिना प्रबुद्धः अतिथिः।

NCERT 10th Sanskrit (Shemushi) Chapter 8, class 10 Sanskrit (Shemushi) Chapter 8 solutions

**Additional Important Questions and Answers**

पठित-अवबोधनम्

I. पठित-सामाग्र्याम् आधारितम् अवबोधनकार्यम्

अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत

(क) कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः । परमर्थकार्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।



प्रश्ना :

**I.** एकपदेन उत्तरत

(i) केन पीडितः निर्धनः जनः पदातिः एव प्राचलत्?

(ii) निर्धनः जनः भूरि परिश्रम्य किम् अर्जितवान्?

उत्तर:

(i) अर्थकार्येन

(ii) वित्तम्

**II.** पूर्णवाक्येन उत्तरत

पिता किमर्थं व्याकुलः जातः**?**

उत्तर**:**

तनूजस्य रुग्णताम् आकर्ण्य पिता व्याकुलः जातः।

**III.** प्रदत्तविकल्पेभ्यो उचितम् उत्तरं चित्वा लिखत

**(i)** 'तनयः' इति कर्तृपदस्य क्रियापदं किम्**?**

(क) निवसन्

(ख) अध्ययने

(ग) समभूत्

(घ) संलग्नः

उत्तर**:**

(ग) समभूत्

**(ii)** पुत्रस्य' इत्यर्थ गद्यांशे किम् पदं प्रयुक्तम्**?**

(क) तनूजस्य

(ख) तनयः

(ग) स्वपुत्रं

(घ) पुत्रं

उत्तर**:**

(क) तनूजस्य

**(iii)** 'तेन' इति सर्वनामपदं कस्मै प्रयुक्तम्**?**

(क) पुत्राय

(ख) निर्धनजनाय

(ग) जनः

(घ) पुत्रः

उत्तर:

(ख) निर्धनजनाय

**(iv)** ‘गृहीत्वा’ इति पदस्य विपरीतार्थकम् पदं किम्**?**

(क) विहाय

(ख) पदातिः

(ग) संलग्नः

(घ) भूरि

उत्तर:

(क) विहाय

(ख) तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथि: चौरशङ्कया तमन्वधावत् अगृहणाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत “चौरोऽयं चौरोऽयम्” इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

प्रश्नाः

**I.** एकपदेन उत्तरत

(i) वस्तुतः चौरः कः आसीत्?

(ii) निहिताम् मञ्जूषाम् आदाय कः पलायित?

उत्तर:

(i) आरक्षी

(ii) चौरः

**II. पूर्णवाक्येन उत्तरत**

प्रबुद्धाः ग्रामवासिनः किम् अकरोत्?

उत्तर:

प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्र आगच्छन् वराकम् अतिथिम् एव चौरं मत्वा अभर्त्सयन्।

**III. प्रदत्तविकल्पेभ्यो उचितम् उत्तरं चित्वा लिखत**

**(i)** ‘प्राक्षिपत्’ इति क्रियापदस्य कर्तृपदं किम्**?**

(क) रक्षापुरुषः

(ख) अतिथिं

(ग) चौरः

(घ) अयं

उत्तर:

(क) रक्षापुरुषः

**(ii)** ‘जागरितः’ इति पदस्य समानार्थकम् पदं किम्**?**

(क) प्रबुद्धाः

(ख) प्रबुद्धः

(ग) आरक्षी

(घ) पलायितः

उत्तर:

(ख) प्रबुद्धः

**(iii)** ‘तस्य तारस्वरेण’ अत्र ‘तस्य’ इति सर्वनामपदं कस्य कृते प्रयुक्तम्**?**

(क) चौरः

(ख) चौरस्य

(ग) चौराय

(घ) अतिथये

उत्तर:

(ख) चौरस्य

**(iv)** ‘अतिथिः’ इति पदस्य विशेषणपदं किम्**?**

(क) प्रबुद्धः

(ख) पदध्वनिना

(ग) चौरशङ्कया

(घ) चौरः

उत्तर:

(क) प्रबुद्धः

(ग) आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच-“रे दुष्ट! तस्मिन् दिने त्वयाऽहं

चोरिताया मञ्जूषाया ग्रहणाद् वारितः । इदानीं निजकृत्यस्य फलं भुक्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।

प्रश्नाः

**I.** एकपदेन उत्तरत

**(i)** कृशकायः कः आसीत्**?**

**(ii)** भारवतः शवस्य स्कन्धेन वहनं कस्य कृते दुष्करम् आसीत्**?**

उत्तर:

(i) अतिथिः

(ii) अतिथेः

**II.** पूर्णवाक्येन उत्तरत

जनस्य क्रन्दनं निशम्य आरक्षी किम् उक्तवान्**?**

उत्तर**:**

जनस्य क्रन्दनं निशम्य आरक्षी उक्तवान्-"रे दुष्ट! तस्मिन् दिने त्वया अहम् चोरितायाः मञ्जूषायाः ग्रहणात् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्षव। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे।"

**III.** प्रदत्तविकल्पेभ्यो उचितम् उत्तरम् चित्वा लिखत

**(i)** 'स्थापितवन्तौ' इति क्रियापदस्य कर्तृपदं किम्**?**

(क) एकस्मिन्

(ख) चत्वरे

(ग) उभौ

(घ) शवं

उत्तर:

(ग) उभौ

**(ii)** ‘प्रसन्नः’ इति पदस्य पर्यायः कः**?**

(क) क्रन्दनं

(ख) मुदितः

(ग) भारवतः

(घ) कृशकायः

उत्तर:

(ख) मुदितः

**(iii)** ‘तस्य क्रन्दन……।’ अत्र ‘तस्य’ सर्वनामपदं कस्मै प्रयुक्तम्**?**

(क) रक्षापुरुषायः

(ख) न्यायाधीशाय

(ग) अतिथये

(घ) अतिथिः

उत्तर:

(ग) अतिथये

**(iv)** ‘पटाच्छादित’ इति पदस्य विशेष्यपदं किम्**?**

(क) निहितं

(ख) काष्ठफलके

(ग) काष्ठं

(घ) देह उत्तराणि

उत्तर:

(घ) देह उत्तराणि

(घ)न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्-मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे' इति। न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

प्रश्नाः

**I.** एकपदेन उत्तरत

**(i)** कः प्रावारकम् अपसार्य न्यायाधीशं अभिवादयति स्म**?**

**(ii)** न्यायाधीशेन पुनः तौ कस्याः विषये वक्तुम् आदिष्टौ**?**

उत्तर:

(i) शवः

(ii) घटनायाः

**II.** पूर्णवाक्येन उत्तरत

न्यायाधीशः कथम् न्यायम् अकरोत्**?**

उत्तर:

न्यायाधीशः आरक्षिणे कारादण्डम् आदिश्य अतिथिं च ससम्मानं मुक्तवान्।

**III.** प्रदत्तविकल्पेभ्यो उचितम् उत्तरम् चित्वा लिखत

**(i) 'लप्स्यसे' इति क्रियापदस्य कर्तृपदं किम्?**

(क) त्वं

(ख) अतिथिः

(ग) आरक्षी

(घ) न्यायाधीशः

उत्तर:

(क) त्वं

**(ii) 'आरक्षिणा' इति पदस्य विशेषणपदं किम्?**

(क) अध्वनि

(ख) एतेन

(ग) यदुक्तं

(घ) मान्यवर

उत्तर:

(ख) एतेन

**(iii) 'मार्गे' इत्यर्थ गद्यांशे किम् पदम् प्रयुक्तम्?**

(क) आरक्षिणे

(ख) अपसार्य

(ग) एतेन

(घ) अध्वनिः

उत्तर:

(घ) अध्वनिः

**(iv)** ‘त्वं’ सर्वनामपदं कस्य कृते प्रयुक्तम्**?**

(क) न्यायाधीशस्य

(ख) अतिथेः

(ग) अतिथये

(घ) आरक्षी

उत्तर:

(ख) अतिथेः

**II.** प्रश्ननिर्माणम्

अधोलिखितकथनेषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत

(i) तनयः छात्रावासे निवसन् अध्ययने संलग्नः समभूत्।

(ii) करुणापरः गृही तस्मै आश्रयं प्रायच्छत्।

(iii) ग्रामवासिनः स्वगृहात् निष्क्रम्य तत्र आगच्छन्।

(iv) न्यायाधीशः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान्।

(v) अभियुक्तः कृशकायः आसीत्।

प्रश्नाः

(i) तनयः कुत्र निवसन् अध्ययने संलग्नः समभूत्?

(ii) कीदृशः गृही तस्मै आश्रयं प्रायच्छत्?

(iii) के स्वगृहात् निष्क्रम्य तत्र आगच्छन्?

(iv) न्यायाधीशः काभ्यां पृथक्-पृथक् विवरणं श्रुतवान्?

(v) अभियुक्तः कीदृशः आसीत्?

**III.** कथाक्रमसंयोजनम्

अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत

(i) न्यायाधीशः आरक्षिणे कारादण्डम् आदिश्य तं जनं ससम्मानं मुक्तवान्।

(ii) कश्चन निर्धनः जनः भूरि परिश्रम्य किञ्चिद् वित्तम् उपार्जितवान्।

(iii) न्यायाधीश: आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुम् आदिष्टवान्।

(iv) तौ न्यायालये स्व-स्व पक्षं पुनः स्थापितवन्तौ।

(v) रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

(vi) सः पिता तनूजस्य रुग्णताम् आकर्ण्य व्याकुलः जातः पुत्रं द्रष्टुम् च प्रस्थितः।

(vii) सः पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थं उपागतः।

(viii) उभौ शवम् आनीय एकस्मिन् चत्वरे स्थापितवन्तौ।

उत्तर:

(i) कश्चन् निर्धनः जनः भूरि परिश्रम्य किञ्चिद् वित्तम् उपार्जितवान्।

(ii) सः पिता तनूजस्य रुग्णताम् आकर्ण्य व्याकुलः जातः पुत्रं द्रष्टुम् च प्रस्थितः।

(iii) सः पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थं उपागतः।

(iv) रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

(v) तौ न्यायालये स्व-स्व पक्षं पुनः स्थापितवन्तौ।

(vi) न्यायाधीशः आरक्षिणम् अभियुक्तम् च तं शवं न्यायालये आनेतुम् आदिष्टवान्।

(vii) उभौ शवम् आनीय एकस्मिन् चत्वरे स्थापितवन्तौ।

(viii) न्यायाधीशः आरक्षिणे कारादण्डम् आदिश्य तं जनं ससम्मानं मुक्तवान्।

**IV.** प्रसङ्गानुकूलम् उचितार्थम्

**I.** अधोलिखितवाक्येषु रेखाङ्कितपदानाम् कृते उचितम् अर्थं चित्वा लिखत

**(i)** अर्थकार्येन पीडितः सः पदातिः एव प्राचलत्।

(क) कृपणतया

(ख) धनस्य अभावेन

(ग) धनस्य आधिक्येन

(घ) धनस्य प्रचुरतया

उत्तर:

(ख) धनस्य अभावेन

**(ii)** प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा।

(क) एकान्ते

(ख) विरक्ते

(ग) निर्गन्धे

(घ) प्रदूषणे

उत्तर:

(क) एकान्ते

**(iii)** सर्वं वृत्तम् अवगत्य सः तं निर्दोषम् अमन्यत।

(क) गत्वा

(ख) आगत्य

(ग) ज्ञात्वा

(घ) ज्ञानं

उत्तर:

(ग) ज्ञात्वा

**(iv)** एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि।

(क) मार्गे

(ख) द्वारे

(ग) ध्वनिरहितं

(घ) तूष्णीम्

उत्तर:

(क) मार्गे

**(v)** त्वया अहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः।

(क) गृहीतः

(ख) निवारितः

(ग) धावितः

(घ) वरणं कुरुत

उत्तर:

(ख) निवारितः

**V.** पर्यायपदानि/विलोमपदानि

प्रश्न **1.**

अधोलिखितपदानां पर्यायपदानि लिखत

अवगत्य, आरक्षी, मार्गे, निशम्य

उत्तर:

अवगत्य — ज्ञात्वा, विज्ञाय।

आरक्षी — सैनिकः, रक्षकः।

मार्गे — अध्वनि, पथे।

निशम्य — श्रुत्वा, आकर्ण्य

**प्रश्न 2.**

अधोलिखितपदानां विलोमपदानि मञ्जूषायां दत्तेषु पदेषु चित्वा यथासमक्षं लिखत

तमः, धनिकः, संकीर्णे, स्वल्पं, आरक्षी

पदानि — विलोमपदानि

(i) चौरः — …………

(ii) प्रसृते — …………

(iii) भूरि — …………

(iv) निर्धनः — …………

(v) प्रकाशः — …………

उत्तर:

पदानि — विलोमपदानि

(i) चौरः — आरक्षी

(ii) प्रसृते — संकीर्णे

(iii) भूरि — स्वल्पम्

(iv) निर्धनः — धनिकः

(v) प्रकाशः — तमः

NCERT 10th Sanskrit (Shemushi) Chapter 8, class 10 Sanskrit (Shemushi) Chapter 8 solutions

# Chapterwise NCERT Solutions for Class 10 Sanskrit (Shemushi) :


- Chapter 1: शुचिपर्यावरणम्
- Chapter 2-बुद्धिर्बलवती सदा
- Chapter 3-व्यायामः सर्वदा पथ्यः
- Chapter 4-शिशुलालनम्
- Chapter 5-जननी तुल्यवत्सला
- Chapter 6-सुभाषितानि
- Chapter 7-सौहार्दं प्रकृतेः शोभा
- Chapter 8-विचित्रः साक्षी
- Chapter 9-सूक्तयः
- Chapter 10-भूकंपविभीषिका
- Chapter 11-प्राणेभ्योऽपि प्रियः सुहृद्
- Chapter 12-अनयोक्त्य

# About NCERT

The National Council of Educational Research and Training is an autonomous organization of the Government of India which was established in 1961 as a literary, scientific, and charitable Society under the Societies Registration Act. The major objectives of NCERT and its constituent units are to: undertake, promote and coordinate research in areas related to school education; prepare and publish model textbooks, supplementary material, newsletters, journals and develop educational kits, multimedia digital materials, etc.Organise pre-service and in-service training of teachers; develop and disseminate innovative educational techniques and practices;collaborate and network with state educational departments, universities, NGOs and other educational institutions; act as a clearing house for ideas and information in matters related to school education; and act as a nodal agency for achieving the goals of Universalisation of Elementary Education.In addition to research, development, training, extension, publication and dissemination activities, NCERT is an implementation agency for bilateral cultural exchange programmes with other countries in the field of school education.Its headquarters are located at Sri Aurobindo Marg in New Delhi. Visit the Official NCERT website to learn more.